इति न भवति। अथ वा अकारान्तोऽयमादेशः आद्युदात्तो निपात्यते। सर्तेर्वेगितायां गतौ धावादेशमिच्छन्ति। अन्यत्र[1] सरति, अनुसरति [2]इत्येव भवति ॥

## ज्ञाजनोर्जा। (७९/२५११)

ज्ञ जन इत्येतयोः जादेशो भवति शिति[3] परतः। जानाति। जायते। जने[4]र्दैवादिकस्य ग्रहणम्[5] ॥

## प्वादीनां ह्रस्वः। (८०/२५५८)

पू इत्येवमादीनां ह्रस्वो भवति शिति [6]परतः। प्वादयः क्र्यादिषु पठ्यन्ते। 'पूञ् पवने' (धा. पा. १४८३) इत्यतः प्रभृति 'प्ली गतौ' (धा. पा. १५०४) वृत् इति यावत् केचित् इच्छन्ति, वृत्करणमेतत् ल्वादीनां प्वादीनां च [7]परिसमाप्त्यर्थम् इति। अपरे तु ल्वादीनामेव [8]परिसमाप्त्यर्थं वृत्करणमेतदिच्छन्ति, आगणान्ताः प्वादयः इति। पूञ् – पुनाति। लूञ् – लुनाति। स्तॄञ् – स्तृणाति। येषामागणान्ताः प्वादयः तेषां जानाति इत्यत्र ह्रस्वः प्राप्नोति, 'ज्ञाजनोर्जा' (७.३.७९/२५११) इति दीर्घकरणसामर्थ्यान्न [9]भवति। जनेरपि हि जादेशे सति 'अतो दीर्घो यञि' (७.३.१०१/२१७०) इति दीर्घत्वेन जायते इति सिध्यति ॥

## मीनातेर्निगमे। (८१/३५८५)

मीनातेरङ्गस्य शिति [10]प्रत्यये परतो ह्रस्वो भवति निगमविषये। प्रमिणन्ति व्रतानि। निगमे इति किम्? प्रमीणाति ॥

## मिदेर्गुणः। (८२/२३४६)

मिदेरङ्गस्य [11]इको गुणो भवति शिति प्रत्यये परतः। मेद्यति, मेद्यतः, मेद्यन्ति। शिति इत्येव, मिद्यते[12] ॥

## जुसि च। (८३/२४८१)

जुसि [13]च प्रत्यये [14]परतः इगन्तस्याङ्गस्य गुणो भवति। अजुहवुः। [15]अबिभयुः। अबिभरुः। अथ [16]चिनुयुः, सुनुयुः इत्यत्र कस्मान्न भवति? अत्र हि द्वे ङित्त्वे, सार्वधातुकाश्रयम्[17], यासुडाश्रयं च। तत्र नाप्राप्ते सार्वधातुकाश्रयङित्त्वनिमित्ते प्रतिषेधे जुसि[18] गुणः आरभ्यमाणः[19] तमेव बाधते। यासुडाश्रयङित्त्वनिमित्तं तु न बाधते, तत्र हि प्राप्ते चाप्राप्ते च आरभ्यते [20]इति ॥

---

1. प्रसरति इ. ह 2. इत्येवं क. 3. प्रत्यये इत्यधिकम् क. 4. दिवादिकस्य क. 5. जनी प्रादुर्भावे इति,न तु जनी जनने इति जुहोत्यादिकस्य इत्यधिकम् इ. 6. प्रत्यये इत्यधिकम् क. 7–8. परिग्रहार्थम् ब. 9. भविष्यति इ. 10. प्रत्यये नास्ति क. 11. इकः नास्ति क. 12. मिदेः इति किम्? खिद्यति। लघूपधगुणस्य ङित्त्वात् प्रतिषेधे प्राप्ते वचनमिदमारभ्यते। इत्यधिकम् क. 13. च नास्ति क. 14. परतः नास्ति ब. 15. अबिभयुः नास्ति इ. 16. चिनुमः ब. 17. कार्यं इत्यधिकम् क. 18. च इति इत्यधिकम् क. 19. तन्निमित्तं प्रतिषेधमेव क. 20. इति नास्ति क.